# ।। दीनदयालुर्भव।।

(संस्कृतनाटकम्)



शङ्करनारायणः,पूर्णवेदपुरी

पूर्णवेदपुरी

2016

**।। श्रीरस्तुनः ।।**

# ।आमुखप्रस्तावः।

द्वादशकक्ष्यायाः (उपभाषा) संस्कृतपाठपुस्तके दीनदयालुर्भवेति कथा समाकलिता वर्त्तते। श्रीनारायणगुरुदेवस्य दीनदयालुतां प्रस्फुटमाख्यायन्ती काचन घटना कथारूपेण तस्मिन्नुपवर्णिता। तां कथामुपजीव्य रचितः अयं नाटकः।निरन्तरमूल्यनिर्णय प्रवर्तनेषु कथायाः नाटकरूपेण परिवर्तनमिति कश्चन प्रवर्तनं अस्ति। नाटकाभिनयश्चानेनोद्दिष्टा भवति। एतदर्थं तथा संस्कृतोत्सवे नाटकस्पर्धायै भागं चिकीर्षूणां छात्राणाम् , अध्यापकानामपि साहायकं स्यादिति मत्वा सहृदयानां पुरतो समर्पये

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।

इति शम्।

**SANKARANARAYANAN.A**

।। कथापात्राणि ।।

1 श्रीनारायणगुरुदेवः।

2 कश्चन चोरः।

3 रक्षिपुरुषौ।

4 महाकविःकुमारगुरुः।

5 पल्पु भिषग्वरः।

6 कतिपये आश्रमान्तेवासिनः।

7 केचन पौरप्रमुखाः।

# ।। दीनदयालुर्भव।।

( प्रथमो रङ्गः)

**यस्य स्फीतदयालुतार्णवजले मग्नो नु लोकः सदा**

**एका जातिरथैकदैवमपिमर्त्योत्कर्षदं शिक्षणम्।**

**इत्युद्घुष्य स्वयञ्च जातिरहितं येन प्रघुष्टं शिवं**

**तं नारायणरूपदैवतमहं वन्दे सदा प्राञ्जलिः।।**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः - ( सभां साकूतं विलोक्य)सकलशास्त्रार्णवपारङ्गतैरलङ्कृते अस्मिन् परिषदि नूतनेन केनापि नाटकेन सभेयं रञ्जयितव्येति सोल्लासं सभानाथेनाज्ञप्ता। किन्नु कुर्मः। तथा हि 2016 आगस्तमासस्यान्तिमार्धे केरलेषु उपगोश्रीपुरे तेवराजनपदे प्रचालिते त्रिदिनात्मिके संस्कृताध्यापकप्रशिक्षणपरिषदि शङ्करनारायणाभिधानेन केनचिदध्यापकेन अस्फुटधीरपि गुरुकारुण्यजनितस्फुटधीमता नाटकरूपेण परिवर्तितां पाठपुस्तकान्तर्गतां दीनदयालुर्भवेति कथां सम्प्रति अवतारयामः । तथा हि -

**कथा प्रसिद्धा खलु केरलेषु नारायणाचार्यवरस्य वृत्तं ।**

**कृतं च तत् संस्कृतवाणिविज्ञैरानन्दलब्ध्यै किमतः परं स्यात् ।।**

अये नाटकारम्भाय शैलूषान् सज्जीकरोमि । ( नेपथ्ये महान् कोलाहलः)

सूत्रधारः ( कर्णं दत्वा) किन्नु मयि विज्ञापिते महान् कोलाहलः इव श्रूयते । (परिक्रम्यावलोक्य च) अये! एते जनाः आश्रमाद् कदलीफलगुञ्जचोरं पुरुषं न्यायाधीशाज्ञया ताडनशतदण्डनाय दण्डनस्थलं नयन्ति।

(इति स्थापना)

( ततः प्रविशति यथोक्तनिर्दिष्टः निबद्धकरचरणः चोरः रक्षिपुरुषौ आश्रमान्तेवासिनःकतिपयजनाश्च।)

प्रथमः - भो रक्षिपुरुषः, चोरमेनं शीघ्रं दण्डय ।

द्वितीयः - कः सन्देहः ? विलम्बश्चेत् एष दास्याः पुत्रः रक्षेत् येन केनापि प्रकारेण।

**चोरस्य दण्डने कालविलम्वो नैव युज्यते ।**

**अन्यथा चेत्तदस्यैव मोचनाय भविष्यति।।**

रक्षिपुरुषौ - ( दण्डनयन्त्रे तं संस्थाप्य करचरणौ बन्धयतः) अरे रे चोराधम परिपावनादाश्रमात् कदलीफलगुञ्जं चोरयतः ते दण्डनाय मे करः स्पृहयते। (दण्डनाय त्रोत्रं उन्नमति)

शिष्योषु अन्यतमः - ( धावन् प्रविश्य) भो रक्षिपुरुषौ मा दण्डयेनम्। संप्रति हि अचार्यो दीनदयालुः करुणापारावारः नारायणगुरुदेवः मुहूर्ताभ्यन्तरे अत्रागमिष्यति। तत् तावन्मुहूर्तं प्रतिपालयत यावदस्य इङ्गितं च विज्ञाय समुचितो दण्डः क्रियताम्।

प्रथमः - युज्यते।

(ततः प्रविशति कुमारगुरुपल्पुभिषग्वर्याभ्याम् अनुगतः गुरुदेवः)

द्वितीयः - (परितो विलोक्य) । अये कुमारगुरुपल्पुभिषग्वर्याभ्याम् अनुगतः गुरुदेवः आगतः।

सर्वे ससम्भ्रमं उत्थाय - नमः कारुण्यनिधये नारायणगुरुदेवाय।

रक्षिपुरुषौ - नमः समाजोद्धारणैकव्रतधारिणे करुणासिन्धवे।

गुरुदेवः - स्वस्ति। ( उपविश्य, सर्वान् जनान् चोरं च विलोक्य) कुतो अयं दण्डनाय बन्धितः। केन वा दण्डः विहितः।

एकः रक्षिपुरुषः- आश्रमात् कदलीफलगुञ्जमचोरयदसौ।

अपरः रक्षिपुरुषः - आश्रमाधिकारिणस्त्वैनं न्यायाधीशाभ्याशमनयन् । न्यायाधीशेन ताडनशतदण्डाय विहितः। तेन हि..... ( अर्धोक्तौ विरमति।)

गुरुदेव - ( तं चोरं उपेत्य दयापूर्णलोचनैः वीक्ष्य च) वत्स केन वा कारणेन चौर्यं कृतं त्वया। यदि ते कदलीफलाय स्पृहा चेत् वद। सर्वमिदं ते प्रदास्ये।

चोरः - (रोदिति) क्षमस्व गुरो। अपराध्यहं। मदीया दारिद्र्यजा बुभुक्षा एव एतादृशे अधर्मकर्मणि मां प्रेरयति। दिनत्रयं यावदहं मम दाराः अपत्यानि अन्नपानादिकं न कृतवान्तः। (गुरुपादयोः पतति)

(गुरोः मुखं सन्तापेन म्लानं जातं )

गुरुदेवः - यस्मिन् देशे एकः दारिद्रेण बुभुक्षया कदलीफलचेरणं कृत्वा दण्डनाय विहितः तत्रत्यवायोरपि मलिनता स्यात्। नाहं स्पृहयाम्यत्र उषितुम्। ( प्रतिनिवर्तनाय त्वरते) ( सर्वे विस्मयस्तब्धाः)

कुमारगुरुः - (आचार्यमुपसृत्य) गुरो क्षम्यतां आज्ञानेन कृतापराधीन् इमान् जनान् आश्रमवासिनश्च। मुहूर्तं प्रतिपालयस्व यावदस्य मोचनाय न्यायाधीशं निवेदयामि। ( पल्पु भिषग्वरमुपेत्य कर्णे जनान्तिकम् ) एवमेव। (प्रकाशम्)शीघ्रं क्रियताम्।

रक्षिपुरुषौ - (चोरं प्रमुच्य। गुरुपादाभ्यां प्रणम्य च ) गुरो क्षमां याचावहे।

जनाः - ( साञ्जलिबद्धेन करेण) एते वयमपि क्षमां याचामहे।

गुरुदेवः - (प्रीतः सन्) वत्साः दीनेषु दयालुता एव कार्यः। न क्रूरता। स्नेहवचोभिः तान् उन्नमय। तेषां मानसिकपरिणमनम् एवं क्रियताम्।

अपरञ्च-

**दीनान् प्रति दयालु स्याः, तदस्मज्जीवनव्रतम्।**

**अनेनैव समाजस्य प्रगतिः,शं सदास्तु वः ।।**

( भरतवाक्यम् )

**येन स्वयं विविधजातिमतान्धमग्नान्**

**मर्त्यान् समुन्नमितुमामरणं प्रयत्नम्।**

**कृत्वा स्वकीयसमभावनया ललास**

**सो शं करोतु भगवान्गुरुदेवमूर्तिः।।**

**पूर्णवेदपुरवीसिना कथा शङ्करेण परिवर्त्य निर्मिता।**

**पूर्णवेदतनुः श्रीपतिः स्वयंरक्षतान्निखिलपापहारि माम्।।**


**PREPARED BY-**

**SANKARANARAYANAN.A**

**HSS TEACHER**

**GOVT.SANSKRIT HSS THRIPUNITHURA**